# shrIgomatyambAShTakam

# શ્રીગોમત્યમ્બાષ્ટકમ્

## Document Information

Text title : Gomati Ambashtakam

File name : gomatyambAShTakam.itx

Category : aShTaka, devii, pArvatI, devI

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Latest update : August 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 27, 2024

*sanskritdocuments.org*

# શ્રીગોમત્યમ્બાષ્ટકમ્

ૐ શ્રીગણેશાય નમઃ ॥

ભૂકૈલાસે મનોજ્ઞે ભુવનવનવૃતે નાગતીર્થોપકણ્ઠે
રત્નપ્રકારમધ્યે રવિચન્દ્રમહાયોગપીઠે નિષણ્ણમ્ ।
સંસારવ્યાધિવૈદ્યં સકલજનનુતં શઙ્ખપદ્માર્ચિતાઙ્ઘ્રિં
ગોમત્યમ્બાસમેતં હરિહરવપુષં શઙ્કરેશં નમામિ ॥

લક્ષ્મીવાણીનિષેવિતામ્બુજપદાં લાવણ્યશોભાં શિવાં
લક્ષ્મીવલ્લભપદ્મસમ્ભવનુતાં લમ્બોદરોલ્લાસિનીમ્ ।
નિત્યં કૌશિકવન્દ્યમાનચરણાં હ્રીઙ્કારમન્ત્રોજ્જ્વલાં
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૧॥

દેવીં દાનવરાજદર્પહરિણીં દેવેન્દ્રસમ્પત્પ્રદાં
ગન્ધર્વોરગયક્ષસેવિતપદાં શ્રીશૈલમધ્યસ્થિતામ્ ।
જાતીચમ્પકમલ્લિકાદિકુસુમૈઃ સંશોભિતાઙ્ઘ્રિદ્વયાં
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૨॥

ઉદ્યત્કોટિવિકર્તનદ્યુતિનિભાં મૌર્વીં ભવામ્ભોનિધેઃ
ઉદ્યત્તારકનાથતુલ્યવદનામુદ્યોતયન્તીં જગત્ ।
હસ્તન્યસ્તશુકપ્રણાળસહિતાં હર્ષપ્રદામમ્બિકાં
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૩॥

કલ્યાણીં કમનીયમૂર્તિસહિતાં કર્પૂરદીપોજ્જ્વલાં
કર્ણાન્તાયતલોચનાં કળરવાં કામેશ્વરીં શઙ્કરીમ્ ।
કસ્તૂરિતિલકોજ્જ્વલાં સકરુણાં કૈવલ્યસૌખ્યપ્રદાં
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૪॥

વૈડૂર્યાદિસમસ્તરત્નખચિતે કલ્યાણસિંહાસને
સ્થિત્વાઽશેષજનસ્ય પાલનકરીં શ્રીરાજરાજેશ્વરીમ્ ।

ભક્તાભીષ્ટફલપ્રદાં ભયહરાં ભણ્ડસ્ય યુદ્ધોત્સુકાં
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૫॥

શૈલાધીશસુતાં સરોજનયનાં સર્વાઘવિધ્વંસિનીં
સન્માર્ગસ્થિતલોકરક્ષણપરાં સર્વેશ્વરીં શામ્ભવીમ્ ।
નિત્યં નારદતુમ્બુરુપ્રભૃતિભિર્વીણાવિનોદસ્થિતાં
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૬॥

પાપારણ્યદવાનલાં પ્રભજતાં ભાગ્યપ્રદાં ભક્તિદાં
ભક્તાપત્કુલશૈલભેદનપવિં પ્રત્યક્ષમૂર્તિં પરામ્ ।
માર્કણ્ડેયપરાશરાદિમુનિભિઃ સંસ્તૂયમાનામુમાં
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૭॥

ચેતારણ્યનિવાસિનીં પ્રતિદિનં સ્તોત્રેણ પૂર્ણાનનાં (શ્વેતારણ્યનિવાસિનીં)
ત્વત્પાદામ્બુજસક્તપૂર્ણમનસાં સ્તોકેતરેષ્ટપ્રદામ્ ।
નાનાવાદ્યવૈભવશોભિતપદાં નારાયણસ્યાનુજાં meter?
શ્રીપુન્નાગવનેશ્વરસ્ય મહિષીં ધ્યાયેત્સદા ગોમતીમ્ ॥ ૮॥

ઇતિ શ્રીગોમત્યમ્બાષ્ટકં સમ્પૂર્ણમ્ ।

ઇતિ શિવમ્ ॥

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

---

*shrIgomatyambAShTakam*
pdf was typeset on August 27, 2024

Please send corrections to *sanskrit@cheerful.com*